Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# भारतीयज्ञानपरम्परायां मानवविकासे संस्काराणां महत्त्वम्

**डॉ. इक्कुर्ति. वेङ्कटेश्वर्लु**
**सहायकाचार्यः, शिक्षापीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली ।**

**Article Info**
Volume 5, Issue 2
**Page Number :** 83-90
**Publication Issue :**
March-April-2022
**Article History**
Received : 01 March 2022
Published : 17 March 2022

**शोधसारांशः-** भारतीयज्ञानपरम्परायां मानवविकासाय वेदारभ्य अनेकानि शास्त्राणि मानवजीवनपद्धतिं निर्दिशन्ती आसन्। तत्र मानवविकासविषयकं विचारः भारतीयज्ञानपरम्परायां संस्कारेषु उपनिबद्धः वर्तते। तेषु उपनयन-समावर्तन-विद्यारम्भादि संस्काराः मानवविकासाय अत्यन्तमुपकुर्वन्ति।

**मुख्यशब्दः-** संस्काराः, मानवः, विकासः, संस्कारः, दैहिकः, मानसिकः ,बौद्धिकः।

मानवः सर्वजीवेषु अन्यतमः भवति। मानवस्य विकासः समाजेन भवति। प्रत्येकेन समाजेन मानवस्य विकासः तत् समाजस्य रूपरेखानुसारं भवति। तदैव भारतीयसमाजेन भारतीयमानवानां विकासः जायते। तत्रापि भारतीयमानवानां विकासस्तु भारतीयज्ञानानुसारं तथैव भारतीयसंस्कृतिसभ्यतानुसारञ्च भवति। तत्र भारतीयज्ञानपरम्परानुसारं मानवविकासाय काश्चन संस्काराः धर्मशास्त्रादि ग्रन्थेषु संस्काराणां विश्लेषणं तेषां प्राधान्यञ्च प्रपञ्चितं वर्तते। भारतीयज्ञानपरम्परायानुसारं मानवविकासः जायतेति नास्ति विसंवादः लेशमात्रेऽपि। तदत्र विचार्यते।

**संस्काराः-** भारतीयजीवनविधाने संस्काराणां प्राधान्यं वर्तते। जीवने सर्वाङ्गीण- विकासार्थं संस्काराः क्रियन्ते। यदि व्यक्तेः संस्कारः न क्रियते तर्हि व्यक्तिः संस्कारवान् न भवति । संस्कारस्याभिप्रायः शुद्धिः धार्मिकक्रियायां तथा व्यक्तेः दैहिक-मानसिक - बौद्धिक - परिष्काराणामनुष्ठानम्, अनेन व्यक्तिः समाजे पूर्णविकसितसदस्यरूपेण परिचितो भवति। किन्तु हैन्दवसंस्कारे बहूनि प्रारम्भिकविचारधार्मिकविधिविधानसहायकनियमानुष्ठानानि च समाविष्टानि। अस्योद्देश्यं केवलमौपचारिकदैहिकसंस्कारेषु सीमितं न भवति। प्रत्युत व्यक्तेः सम्पूर्णव्यक्तित्वस्य पूर्णत्वसम्पादनम्। वस्तुतः सर्वविध- संस्कारेषु संस्कृतव्यक्तेः विलक्षणीयता तथा अवर्णनीयता परिलक्षिता भवति।[1]

संस्कारस्यानुष्ठानं वैदिककालात् पूर्वमभवत् यत्र कर्मकाण्डस्य प्रयोगोऽभवत्। शतपथब्रह्मणे - स इदं देवेभ्यो हविः संस्कुरु साधु संस्कृतं संस्कुर्वित्येवैतदाह[2] इति । पुनः तस्मादुस्री पुंमासं संस्कृते तिष्ठन्तमभ्येति इति वर्णितम्। छान्दोग्योपनिषदि[3] - तस्मादेव एवं यज्ञस्य मनश्च वाक् च वर्तिनी। न्यतरां मनसा संस्करोति ब्रह्म वाचा होता इति दृश्यते। एतेन ज्ञायते यत् संस्काराः व्याक्तिं व्यक्तित्ववन्तं कुर्वन्ति इति। एवञ्च मानवः यदि जन्मना शूद्रोऽपि संस्कारेण द्विजः भवति।[4] अतः व्यक्तिं संस्कर्तुं संस्काराः करणीयाः।

**संस्काराणां वर्गीकरणम्-** भारतीयप्राचीनपरम्परायां संस्काराणां निश्चितसंख्या नास्ति। मनु - याज्ञवल्क्य - विष्ण्वादिषु स्मृतिषु षोडशसंस्काराः निरूपिताः। गौतमधर्मसूत्रे संस्काराः चतुर्दश इति निरूपिताः। महापुराणे तु संस्काराः अष्ट[5] इति निरूपिताः। तथापि भारतीयजीवनविधाने षोडशसंस्काराणां क्रमः अस्ति। ते संस्काराः क्रमशः एवं भवन्ति - 1.

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गर्भाधानम् 2.पुंसवनम् 3. सीमन्तोन्नयनम् 4. जातकर्मविधिः 5. नामकरणम् 6. निष्क्रमणम् 7. अन्नप्रासनम् 8.चूडाकर्म 9. कर्णवेधनम् 10. उपनयनम् 11. वेदारम्भः (विद्यारम्भः) 12. समावर्तनम् 13. विवाहः 14. वानप्रस्थः 15. संन्यासः 16. अन्त्येष्टिः इति।

**जन्मनः प्राक्संस्काराः** - 1.गर्भाधानम् 2.पुंसवनम् 3. सीमन्तोन्नयनम्।

**शैशवावस्थायां संस्काराः** – 4. जातकर्म 5. नामकरणम् 6.निष्क्रमणम् 7.चूडाकर्म 8.अन्नप्राशनम् 9. कर्णवेधः। विद्याध्ययन-संस्काराः – 10. उपनयनसंस्कारः 11. वेदारम्भसंस्कारः 12. समावर्तनसंस्कारः । गृहस्थाश्रमसंस्काराः – 13. विवाहसंस्कारः 14. वानप्रस्थसंस्कारः 15. **संन्याससंस्कारः।**

मरणानन्तरसंस्कारः – 16. अन्त्येष्टिः।

**संस्कारस्य उद्देश्यानि**

1. अवाञ्छितप्रभावस्य निराकरणम्।

2. अभीष्टप्रभावाणामामन्त्रणम्।

3. धन-धान्य-पशु-सन्तान-दीर्घायु-समृद्धि-शक्ति-बुद्धीनां प्राप्तिः।

4. जीवनदशायां बहूनां हर्षानन्दविषयादभावानामभिव्यक्तीकरणम्।

5. सामाजिकविशेषाधिकारेषु दायित्वप्राप्तिः। यथा – उपनयनात् परं वेदाध्ययने धार्मिकक्रियासु च अधिकारः।

6. गर्भबीजसम्बन्धिदोषाणां दूरीकरणम्।

7. स्वर्गमोक्षयोश्च प्राप्तिः। शङ्खलिखितौ कथयतः – संस्कृतः अष्टावात्मगुणैः युक्तः पुरुषः ब्रह्मलोकं प्राप्नोति। यथा – संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः।

नित्यमष्टगुणैर्युक्तो ब्रह्मणो ब्रह्मलौकिकः।

ब्रह्म्यं पदमवाप्नोति यस्मान्नच्यवते पुनः।।

8. व्यक्तेः नैतिकविकासः।

9. व्यक्तित्वस्य निर्माणं विकासश्च। चित्रक्रमेऽपि संस्कारस्य आवश्यकतां प्रतिपाद्य अङ्गिराः कथयति –

चित्रकर्म यथाऽनेकैरङ्गैरुन्मील्यते शनैः।

ब्रह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकम्।।

10. योऽनुभवार्थं सम्पूर्णदैहिकक्रियायामाध्यात्मिकध्येयं सूचयति।

11. व्यक्तेरन्तः करणे सामाजिकदायित्वप्रबोधनम्।

12. अध्ययने प्रभावपूर्णाधिगमसाधनाय इति।

**संस्कारशब्दार्थः संस्कारस्वरूपञ्च-** संस्कारशब्दस्य निष्पत्तिः सम् उपसर्गात् कृञ्धातोः घञ् प्रत्यये भवति। अस्यार्थः प्रतिपन्नोऽनुभवः मानसकर्म वेति मेदिनीकोषकारस्य अभिमतम्। संस्कारतत्त्वमतानुसारं संस्कारशब्दः शुद्धिः अदृष्टविशेषजनकं कर्म च। यथा यद्यग्निस्थापनानन्तरं कर्मकाले वृष्ट्यादि शङ्कया संस्काराग्निरन्यत्रानीयते तदा पुनर्भूसंस्कारः कर्तव्यः। समूह्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्ष्य एव भूसंस्कारः क्रियते गृह्यानुसारात् ।

हलायुधकोशकारमतानुसारं6 संस्कार– शब्दस्यार्थो भवति वासना, प्रतियत्न:, अनुभव:, मानसकर्म, गुणविशेष: पृथिव्यादिचतु: पदार्थगुणश्च।

संस्कारशब्द: अंग्रेजीभाषायां सेक्रामेण्ट[7] इति शब्देन बहुधा व्यवह्रियते। धार्मिकविधिविधानमेव सेक्रामेण्ट शब्दस्यार्थ: । अनेन प्रकारेण बहुत्र धार्मिकक्षेत्रेषु प्रयुक्त: व्याप्तश्चायं शब्द: संस्कृतसाहित्ये शुद्धिप्रायश्चित्तव्रतादिष्वन्तर्भवति ।

संस्कारशब्दं दार्शनिकदृष्ट्या मीमांसका एवमभिप्रयन्ति यत् यज्ञाङ्ग-भूतपुरोडाशादीनां विधिवत् शुद्धिरिति।[8] अद्वैतवेदान्तिन: जीवे शारीर– क्रियाया: मिथ्यारोप9 इति प्रतिपादयन्ति। नैयायिका: भावस्य व्यक्तीकरणाय आत्मव्यञ्जकशक्ति: संस्कार:[10] इति कथयन्ति। संस्कृतसाहित्ये संस्कारस्य प्रयोग: शिक्षासंस्कृति: प्रशिक्षण[11]–सौजन्यपूर्णता–व्याकरणगत– शुद्धि[12]–संस्करण–परिष्करण[13]–शोभा–आभूषण[14]–प्रभाव–स्वरूप– स्वभाव– क्रिया–स्मरणशक्ति:[15]–स्मरणशक्त्या वर्धितप्रभाव[16]–शुद्धक्रिया– धार्मिक– विधिविधान[17]–अभिषेक–विचारभावना–धारणा–परिणामादिक्रियादिषु अर्थेषु प्रयुक्तो दृश्यते।[18] एते सर्वेऽपि क्रियाकलापा: मानवं प्रभावयन्ति। संस्कारेण य: कोऽपि मानव: योग्यवान् भविष्यति[19] एव। संस्कारकरणे व्यक्ते: गुणानाम् आह्वानं, दोषाणां दूरीकरणं च भवति।[20] यदि संस्कार: क्रियते व्यक्ते: मूलप्रवृत्ति: दमिता भवति।[21] तेन व्यक्ति: उत्तमव्यवहारवती, ज्ञानवती च भविष्यति। विद्याधिगमसंस्कारा: (शैक्षणिकसंस्कारा:) यद्यपि षोडशसंस्कारा अपि मानवं सच्छीलवन्तं, ज्ञानवन्तं, संस्कारवन्तं च कुर्वन्ति। तथापि विद्याधिगमसंस्कारा: तु व्यक्तिम् अध्ययनार्थं प्रेरयन्ति। दीक्षाबद्धञ्च कुर्वन्ति। अत: विद्याधिगमसंस्कारा: व्यक्ते: जीवनपरिवर्तने महत्त्वपूर्णा: भवन्ति। मातृगर्भत: जन्मापेक्षयाऽस्य कर्मण: संस्कारेण च गुरुत्वं सर्वाधिकम्। अस्मिन् संस्कारे उपनयनयोग्य: बालक उपनीतो भूत्वा गुरुगृहे स्थित्वा, वेदाध्ययनं करोति। अध्ययनं समाप्य प्रस्थानमपि करोति। विद्याधिगम– संस्कारेषु त्रय: अन्तर्भवन्ति। ते च भवन्ति यथा – 1.उपनयनसंस्कार: 2. वेदारम्भसंस्कार: 3. समावर्तनसंस्कार: ।इदानीमेतेषां संस्काराणां प्रभाव: छात्रेषु कीदृश: इति विमृश्यते ।

**उपनयनसंस्कार**: - नयनं दर्शनं नेत्रम् इति वचनानुसारेण नयनशब्दस्य दर्शनमित्यर्थ:। उप इत्युपसर्गपूर्वक णीञ् प्रापणे इत्यस्मात् धातो: करणाधिकरणयोश्च इति सूत्रेण ल्युट् प्रत्ययो भवति।[22]

उपनयनसंस्कारस्यार्थ: भवति गुरो: समीपं नयनमिति। पिता बालकं गुरो: समीपं नयति। तत्र गुरु: तमुपनीय स्वगृहे स्थापयेदिति।[23] ब्रह्मचारिण: मौञ्जीबन्धनसमये (उपनयनवेलायां) माता सावित्री इति पिता तु गुरुरिव भवति।[25] एवञ्च उपनयनस्य परममुद्देश्यं वेदानामध्ययनमेव। अत: ब्रह्मचारी वेदाध्ययनं तदा एव प्रभावरूपेण कर्तुं प्रभवति। यदा स: उपनीतो भवति।[26] ससिंद्धच्छात्रे प्रभावपूर्णाधिगम: जायते। आचार्यादीनाम् उप–समीपं वटोर्नयनं प्रापणमुपनयनम्। अर्थात् गुरु–विद्या–यम–नियम–देवत्वादिषु श्रद्धा कल्पनेन, नियमकल्पनेन छात्र: द्विज: भवति।[27] उपनयनं विद्यार्थिन: श्रुतित: संस्कार: इति।[28] उपनयनसंस्कारस्यानुष्ठानार्थं कश्चन कालोऽपि धर्मसूत्रकारै: निर्दिष्ट:। तदनुसारं ब्रह्मणस्य अष्टमे वर्षे, क्षत्रियस्य एकादशवर्षे, वैश्यस्य द्वादशवर्षे उपनयनं करणीयमिति।[29]

तेऽनुपनीता: बालका: द्विजकुलेषु जाता अपि कर्मणा शूद्रतुल्या: भवन्ति। अर्थात् अध्ययनाय अनर्हा: भवन्तीति। तादृशसन्दर्भे व्रत्यस्तोमं कृत्वा तत: उपनीतो भूत्वा पुन: अध्ययनाय उपक्रमो विधीयते।[30] कुतश्चेत् जन्मना जायते शूद्र: संस्काराद् द्विज उच्यते इति आर्षवचनात् द्विजत्वं ज्ञानेन, उत्तमव्यवहारेण, सच्छीलेन च प्राप्यते।

अध्यापनार्थमुपयुक्त: गुरु: चेतव्य:। पित्रा गुरो: गुणान् सम्यक् परीक्ष्य अध्यापनयोग्यं गुरुं चिनोति। यदि गुरु: वैदिकनिष्ठ:, कुलीन:, शुचिमान्, श्रोत्रियवान्, अनालस्यपर:[31] च न भवति, तादृशस्य समीपे शिष्य: किमपि अधिगन्तुं न

शक्नोति। उपनयनसमये विधीयमानस्य यज्ञोपवीतस्य माहात्म्यमिदं ग्राह्यम्। यज्ञोपधारणेन ब्रह्मचारिणः बुद्धिशुिद्धः,[32] बलं, तेजः च वर्धते।

**संस्कारसमयः-** उपनयनसंस्कारस्यानुष्ठानार्थं कालः निर्दिष्टो वर्तते। साधारणतः उपनयनं सूर्ये उत्तरायणे स्थितवति सम्पद्यते। वैश्यानां दक्षिणायनं विधीयते। विभिन्नवर्णानां कृतेऽपि संस्कारसमयो निर्दिष्टः। वसन्तकाले ब्रह्मणस्य उपनयनं करणीयं, यतः कालेऽस्मिन् शान्तवातावरणं, तेन उपनीतः छात्रः स्वविद्यां सम्यगधिगन्तुं शक्नोति, सात्विकः च भवितुमर्हतीति। ग्रीष्मकाले क्षत्रियाणाम् उपनयनं करणीयं, तेन क्षत्रियत्वं, राजसं, धनुर्विद्यां च सम्यगधिगच्छन्ति। शरदृतुकाले वैश्यानाम् उपनयनं करणीयम्, तथैव वर्षासु रथकाराणां नाम शूद्रानाम्[33] उपनयनं करणीयमिति। तेन स्वस्वविद्यामधिगन्तु ते ससिंद्धाः भवन्ति।

ज्यौतिषशास्त्रमतानुसारं तेषां ग्रहाणां प्रभावेण कीदृशं फलं लभ्यते इत्यपि निरूपितं वर्तते। माघमासे उपनीतः वटुः महाधनिकः भवति। फाल्गुण– मासे उपनीतः प्रज्ञावान्, मेधावी च भवतीति। चैत्रे उपनीतः सम्यक् विद्यामधि– गच्छति । वैशाखमासे उपनीतः सुखभोगान् प्राप्नोति इति। ज्येष्ठे कीर्तिमान्, आषाढे विजेता, महापण्डितः च भवतीति स्पष्टमुल्लिखितम्।[34]

**वस्त्रधारणम्-** यथा आधुनिककाले अनुशासनार्थं छात्रैः समवस्त्रधारणं क्रियते तथैव प्राचीने काले उपनयनसंस्कारादेव समानवस्त्रधारणं क्रियते स्म। उपनीयमानो ब्रह्मचारी मृगचर्मैः निर्मतवस्त्रं धरति स्म।[35] एवं भिन्नपाठ्यक्रमाध्येतॄणां विभिन्नवस्त्रधारणमासीत्। ब्रह्मविद्याधिगन्तॄणां मृगचर्मवस्त्रं, सैनिकशिक्षाम् अधिगन्तॄणां कृते कार्पाससमवस्त्रं च निर्दिष्टम्।[36] वेषे उपरि वस्त्रम् अधोवस्त्रं च ध्रियते। ब्रह्मणच्छात्रेभ्यः कृष्णमृगचर्मस्य वस्त्रं धरणीयमिति,[37] अन्यच्छात्रैः भेडचर्मेण निर्मितवस्त्रं धरणीयमिति[38] च नियमः कल्पितः। एतत्सर्वमपि स्वविद्यायां दीक्षात्मकश्रद्धामानेतुं प्राचीनकाले अधिगन्तृभ्यः नियमाः कल्पिताः।

**दण्डः-** ब्रह्मचारिणा वस्त्रधारणानन्तरं दण्डधारणं करणीयमासीत्। आचार्यः ब्रह्मचारिणे दण्डमेकं प्रयच्छति स्म। यः दण्डः ब्रह्मचारिणा मन्त्रपूर्वकं गृह्यते, स च दण्डः दीर्घायुर्निमित्तं, वर्चसनिमित्तं शुध्यर्थं च गृह्यते स्म। अन्यथा ब्रह्मचारी विद्यारक्षणनिमित्तमपि दण्डं स्वीकुर्यात्। ब्रह्मणेभ्यः, क्षत्रियेभ्यः, वैश्येभ्यः च क्रमशः पलाश–उदुम्बर–बिल्वदण्डाः च दीयन्ते। अन्ये तु यत् किमपि दण्डं धर्तुं शक्नुवन्ति।[39] ब्रह्मणस्य दण्डः तस्य केशपर्यन्तं, क्षत्रियस्य ललाटान्तं, वैश्यस्य नासिकान्तं च भवेत्।[40] दण्डधारणैः सौम्येन, दर्शने उद्वेगरहिताः, अनग्निदूषिता च भवेयुः।[41] तत्त्वमिदमपि छात्रेषु समानतामानेतुं निर्दिष्टोपायः भवति।

**मेखला-** आचार्यः बालकस्य कटिदेशे चतुर्षु दिक्षु समन्त्रकां मेखलां बध्नीयात्। मेखलासूत्रैः त्रिगुणवेष्टितो भवेत् वटुः। अस्यार्थः भवति ब्रह्मचारी सर्वदा त्रिभिः वेदैरावृतो तिष्ठति। मेखला तं ब्रह्मचारिणं गोपायितुं तथा दुष्प्रभावेभ्यः त्रातुमपि समर्था भवति। मेखला ब्रह्मणस्य मुञ्जनिर्मिता, क्षत्रियस्य धनुर्गुण- निर्मिता, वैश्यस्य ऊर्णासूत्रविशिष्टा भवेत्। कदाचित् सर्वेभ्यः अपि मुञ्जनिर्मिता मेखलाऽपि धर्तुं शक्यते इति।[42]

**यज्ञोपवीतम्-** मेखलाधारणानन्तरं ब्रह्मचारी उपवीतं सूत्रं गृह्णीयात्। यतः संस्कारे- ऽस्मिन् सर्वाधिकं महत्त्वं विद्यते। धर्मशास्त्रनियमानुसारमुपवीतब्रह्मणाय कार्पाससूत्रनिर्मितं, क्षत्रियाय शणनिर्मितं, वैश्यस्याविकसूत्रनिर्मितं यज्ञोपवीतं दीयते स्म।[43] यज्ञोपवीतं ब्रह्मणानां श्वेतं, क्षत्रियस्य रक्तं, वैश्यस्य हरिद्रावर्णं भवेदिति।[44] उपवीतस्य सूत्रं त्रिगुणावृतं भवेदिति। यज्ञोपवीतधारणसमये आचार्यः शिष्यमाशीर्वचनपूर्वकम् आयुष–बल–तेजसा वर्धनार्थं प्रार्थयति।[45] यज्ञोपवीतधारणकाले ब्रह्मचारी सूर्येक्षणं करोति। ब्रह्मचारी उपवीतवस्त्रमेकं धारयति। गृहस्थः उपवीतवस्त्रद्वयं धारयति। आत्मनः निमित्तमेकं,

पत्नी– निमित्तमेकं च धरतीत्यर्थः। यज्ञोपवीतधारणतत्त्वमिदं छात्रं सच्छीलं करोति यतः यज्ञोपवीतं परमं पवित्रमिति। अतः छात्रः यज्ञोपवीतं दृष्ट्वा मनोनिग्रह– पूर्वकविद्यामभ्यस्यति।

**हृदयस्पर्शः-** यज्ञोपवीतधारणानन्तरमाचार्यः ब्रह्मचारिणं स्वशिष्यरूपेण स्वीकरोति। तदनन्तरमाचार्यः शिष्यस्य दक्षिणस्कन्धदेशे उपस्थितो भूत्वा तस्य हृदयं स्पृशति ।[46] अर्थात् तमालिङ्गति। एतेन शिष्यस्य हृदये आचार्यस्य स्थानं गौरवं, दैवसदृशं, पितृतुल्यञ्च भवति।

**आदेशपालनम्-** ततः आचार्यः शिष्यमग्निप्रदक्षिणं कर्तुं तत्र आहूतिदानार्थं च आदिशति। अन्यांश्च नियमानादिशति। ते च नियमाः – दिवा छात्रेण स्नानं न करणीयम्, अतिभाषणं न करणीयम्, अग्नौ समिधादानं प्रतिदिनं करणीयमिति।[47] छात्रः आचार्यस्यादेशानुसारं वचनं पालयति स्म । तेन शिष्यः आचार्यस्य आज्ञाबद्धः, दीक्षाबद्धश्च भवति स्म। एतेन आदेशपालनेन छात्रे क्रियानुबन्धनाधिगमो जायते।

**भैक्षकर्म-** उपनयनसंस्कारे विधिवत् भैक्षकर्मोद्देश्यमिदं निर्दिष्टम्। इयमेव भिक्षा समग्रविद्यार्थिजीवनपर्यन्तं पोषणस्य प्रमुखं साधनमासीत्। उपनयनदिने बालकः मातरं भिक्षां याचते। अपरानपि परिजनान् भगिनीं च सः भिक्षां याचते।[48] स भिक्षामानीय गुरोः कृते समर्पयति।[49] एवं प्रकारेण विधीयमानेन उपनयनसंस्कारेण बालकः छात्रत्वेन द्वितीयजन्म प्राप्नोति। एवञ्च विद्यायाम् आसक्तो भूत्वा सर्वविधविषयान् सम्यगभ्यस्यति ।

अनेन विमर्शनेन विद्यार्थिनां केचन गुणाः प्रकटिताः भवन्ति –

1. मनसः पूर्णस्वातन्त्र्यम्
2. आत्मनियन्त्रणम्
3. सदा सेवासन्नद्धता
4. लोकज्ञानम्
5. सहिष्णुता
6. स्वाध्यायः
7. ईर्षादिगुणानां परित्यागः

संस्कारोऽयं एतन्निर्दिशति यत् विद्यार्थी ज्ञानपथस्य एकः दूरगामी यात्री विद्यते । अनेन संस्कारेण छात्रः विद्यायामासक्तो भविष्यतीति प्राचीनानां धर्मशास्त्रज्ञानां च धीः।

**विद्यारम्भसंस्कारः (गुरुकुले प्रवेशः)-** उपनयनानन्तरं सुतं पिता गुरुकुलं नीत्वा तत्र गुरुकुले (विद्यालये) आचार्यस्य सकाशे वेदाध्ययन–गायत्र्युपासना–शौचाचारादिशिक्षणार्थं स्थाप्यते।[50] स्मृतिकारः व्यासः अस्मिन् विषये प्रथमतः उल्लिलेख। उपनयना– नन्तरं किमपि शुभदिनं निश्चित्य अयं संस्कारः आयोज्यते। गौतमः आश्व– लायनेऽपि वेदारम्भसंस्कारे चत्वारि वेदव्रतानि करणीयानि इति। प्रथमं महानाम्नी, द्वितीयं महाव्रतम्, तृतीयम् उपनिषद्, चतुर्थं गोदानाख्यं[51] च कृत्वा विद्यालये प्रवेशः करणीयः छात्रेण। उपनयनानन्तरमेव पवित्रतमगायत्रीमन्त्राध्ययनेन साकं वेदाध्ययनं प्रारभ्येत।[52]

प्राचीनभारते विद्यायाः प्रारम्भः श्रावणमासे भवति स्म, अतः तस्य संस्कारस्य नाम श्रावणी उपाकर्म[53] इति । एतेन वार्षिकारम्भः भवति। एवं प्रकारेण प्रविष्टच्छात्रेभ्यः आचार्येण विशेषोपदेशः क्रियते।[54] सः उपदेशः अत्यन्तप्रभावी आसीत्। एतेन उपदेशेन छात्राः निद्रा, आलस्यं, भयं, क्रोधादीन् त्यक्त्वा[55] गुरुनियमानुसारं श्रद्धां च प्राप्य वेद–वेदाङ्ग–दर्शन–उपवेद–ब्रह्मण– आरण्यक–उपनिषदादि ग्रन्थान् तेषां रुच्यनुगुणमधिगच्छन्ति स्म।

**समावर्तनसंस्कारः:-** आधुनिकशिक्षाप्रणाल्यामध्ययनानन्तरमर्थात् स्नातक–स्नातकोत्तरा– द्यध्ययनसमननन्तरं यथा दीक्षान्तसमारोहे उपाधिः दीयते। तथैव प्राचीनभारतीय शैक्षिकप्रशासनप्रणाल्यां समावर्तनसंस्कारः इति एकं तत्त्वं भवति।

संस्कारोऽयं ब्रह्मचर्यस्य विद्यार्थिजीवनस्य च परिसमाप्तिं सूचयति। किं नाम समावर्तनम् इति चेत् वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहागमनम्।[56] ब्रह्मचर्यपूर्वकवेदा- ध्ययनानन्तरं गुरोरनुमतिं स्वीकृत्य गृहस्थाश्रमस्वीकरणार्थं ब्रह्मचर्यसमाप्त्यर्थं च कृतं यत् स्नानं तत् समावार्तनमिति[57] सूरिभिः परिकीर्त्यते। मनुमते स्नानम्- समावर्तनम् इति पदद्वयस्यापि एकः एवार्थः। स्नान (समावर्तनं) संस्कारानन्तरं ब्रह्मचारिभ्यः[58] स्नातकोपाधिः दीयते। शास्त्रकाराणां मते स्नातकं त्रिप्रकारकरूपेण परिभाषितं, यथा - विद्यास्नातकं-व्रतस्नातकं-विद्याव्रतस्नातकमिति।[59] अत्र विद्यमानानां त्रयाणां स्नातकानां विद्याध्ययनैव विद्याव्रतस्नातकं च पाल्यते।[60] समावर्तनसंस्कारसमये क्षौरकर्म-स्नान-वस्त्र-आभूषण-केश-नखेत्यादि[61] संस्कारान् अधिगम्य गृहस्थाश्रमे प्रविशत्। स्नातकसमये शिष्याय आचार्येण अन्तिमदीक्षान्तसमारोहे उपदेशः क्रियते। वेदः - सत्दं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः[62] इत्यादि उपदेशेन पुनः शिष्यस्य स्वकर्तव्यं सूचयति आचार्यः। एवं क्रियमाणे समावर्तनसंस्कारेण अन्तेवासिनः गृहस्थाश्रमे कथं भाव्यम्? कथं व्यवहर्त्तव्यम्? कीदृशज्ञानं प्राप्तव्यम्? इत्यादि विषयान् अधिगच्छन्ति स्म।

**उपसंहारः -** भारतीयज्ञानपरम्परायां मानवविकासाय वेदारभ्य अनेकानि शास्त्राणि मानवजीवनपद्धतिं निर्दिशन्ती आसन्। तत्र मानवविकासविषयकं विचारः भारतीयज्ञानपरम्परायां संस्कारेषु उपनिबद्धः वर्तते। तेषु उपनयन-समावर्तन-विद्यारम्भादि संस्काराः मानवविकासाय अत्यन्तमुपकुर्वन्ति।

**पादटिप्पणीः-**

1. आत्मशरीर ..वि.मि.सं.भा.2, पृ.132
2. स इदं देवेभ्यो .... श.ब्र.1.1.4. 10, 3, 2,1.22
3. तस्मादेव .... छा.उ.4.26.12
4. जन्मना .... म.स्मृ.10.125
5. म.पुरा. 30. 51. 68
6. ह.को.पृ. 680
7. आक्सफोर्ड डिक्सनरी .... सेक्रामेण्ट शब्दः
8. प्रोक्षणादि .. वा.स्प.बृ.भा,5, पृ.5188
9. स्नानाचमनादि .... तत्रैव.
10. संस्कारव्यवहारा .... त.भा.पृ.212
11. निसर्गसंस्कार .... र.वं.3.35
12. संस्कारवत्येव.... कु.स.1.28
13. प्रयुक्तसंस्कार .... र.वं.3.28
14. स्वभावसुन्दरं .... अ.शा.7.33
15. यन्नेव याजने .... हि.दे.1.108
16. .संस्कारजन्यं .... त.सं.
17. .कार्यः शरीर .... म.स्मृ.2.26

18. फलानुमेया: .... र.वं.1.20
19.संस्कारो स ..वेदा.सू. 3.1.13.शा.भा
20. संस्कारो हि ..वेदा.सू.1.15, प.शा.भा.
21. एवमेव .... या.स्मृ.1.23
22. उप इत्युपसर्गस्य .... सं.द.51
23. उपनीयमानां .... अ.वे.11.5.3
24 . यत्र यद् .... म.स्मृ.2.170
25. उपनीय .... या.स्मृ.1.15
26. गुरोव्रतानां .... वि.मि.सं.प्र.पृ.334
27. उपनयनं .... आ.स्त.ध.सू.1
28. पा.गृ.सू.2.2; आ.गृ.सू.1.19; शां.गृ.सू.2.1; बौ.गृ.सू.2.5; आ.गृ.सू. 1.1; गौ.गृ.सू.10; म.स्मृ.2.36; या.स्मृ.1.11
29. अत ऊर्ध्वं .... म.स्मृ.2.39
30. ब्रह्मण: .... व्यास: द्रष्टव्यम्
31. यज्ञोपवीतं .... सं.द.57
32. वसन्ते .... बो.गृ.सू.11.5.6
33. माघे मासि .... राज.वि.मि.सं.प्र.354
34. कार्णशैरव .... म.स्मृ.1.41
35. ब्रह्मवृद्धि .... आप.ध.1.1.3. 9.1011
36. हारिणमेणेयं .... तत्रैव
37.आ.गृ.सू.1.10.23, 1.20
38. बैल्वपालाशौ .. गौ.ध.सू. 1.24.27
39. दण्डोऽव्रण: .... म.स्मृ.2.47
40.मौञ्जी ....म. स्मृ.2.42,व.ध.सू. 11.48
41. बौ.ध.सू. 2.7.13
42. कार्पासमुपवीतं .... म.स्मृ.2.44
43. वि.मि.सं.प्र.पृ.415
44. यज्ञोपवीतं .... पा.गृ.सू.2.2.13
45. मम व्रते .... पा.गृ. सू.2.2.18
46. दिवाशयनं मा कुरु .. पा.गृ.सू.2.3.2
47. मातरं वा .... म.स्मृ.2.50

48. समाहृत्य .... म.स्मृ.2.51

49. कृत्वोपमयनं .... सं.द.60

50. प्रथमं स्यान्महानाम्नी .... सं.म.पृ.63

51. महर्षि दयानन्दः .... वे.सं.प्र

52. समारब्धेष्व .... बो.गृ.सू.3.103

53.सब्रह्मचारिणश्च .... जै.गृ.सू.1.14

54. तपोऽशान .... तै.उ.शि.

55. वि.मि.सं.प्र.पृ.564

56. विद्यां समाप्य .... सं.र.62

57.गुरुणाऽनुमतः .... म.स्मृ.3.4

58. वेदं समाप्य .... आश्व.गृ.सू.

59. म.स्मृ.4.31; गो.गृ.सू.3.5.23, आप.ध.सू.1.5, 1.22,23;

60. क्लृप्त .... म.स्मृ.4.35; 61.वेदमानूच्या .... तै .उ. शि.12 अ

**सन्दर्भग्रन्थसूचीः-**


1. संस्काराणां पर्यालोचनम् - डा. जयकृष्णमिश्रः, श्री जगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, 2005।
2. वेदों मे समाजशास्त्र अर्थशास्त्र और शिक्षाशास्त्र - डा. कपिलद्विवेदी, विश्वभारती अनुसन्धान परिषद, ज्ञानपुरम्।
3. भारतीय संस्कृतिः - डा. प्रीति प्रभा गोयल्, विद्यानिधि प्रकाशनम्, दिल्ली।
4. प्राचीनभारत की शिक्षा पद्धति - डा. कृष्णकुमार, मयंक प्रकाशनम्, लखनऊ।
5. https://www.yourarticlelibrary.com/education/indian-education/top-9-educational-rituals-sanskaras-observed-during-ancient-india/63499